षष्ठः पाठः

6


Lesson – 6

# धीरश्चोरः

संस्कृतवाङ्मये नीतिबोधकाः अनेके कथाग्रन्थाः सन्ति । तेषु पञ्चतन्त्रम्, हितोपदेशः इत्यादयः सुप्रसिद्धाः । संस्कृतभाषायाः प्रथमशिक्षणे कथाग्रन्थाः महदुपयोगकराः वर्तन्ते । अस्यां कथायां भुक्कुण्डस्य प्रत्युत्पन्नमतित्वं, राज्ञः कवितावात्सल्यम् इत्यादयः सुष्ठु निरूपिताः सन्ति ।

पुरा धारानगरे भुक्कुण्डो नाम कश्चित् कृतविद्यो धीरश्चोरो बभूव । स कस्याञ्चित् रात्रौ कस्यचित् वणिजः सदनं प्रविश्य महार्घाणि भूषणानि चोरयित्वा गृहं प्रति न्यवर्तत। निभृतं सः नगरमार्गे निर्गच्छन् आरक्षकैः लक्षितो गृहीतश्च ।

अन्येद्युः प्रातरेव तं निगडितपादं ते राजान्तिकं निन्युः । राजा च तम् अवलोक्य - कोऽयम् ? इति आरक्षकान् अपृच्छत् । आरक्षका आहुः –'देव! कुम्भीलकोऽयम् अतीतायां रात्रौ मणिकारवीथ्यां कस्यचित् वणिजः वसतिं प्रविश्य भूषणानि चोरयित्वा गच्छन् अस्माभिः गृहीतः आनीतश्च । श्रुत्वा देवः प्रमाणम्' - इति । तेषां वचः श्रुत्वा राजा कुम्भीलकमपृच्छत् – रे! अपि सत्यं यदेते कथयन्ति'? भुक्कुण्डः तावदात्मनः कृत्यं निह्नोतुम् अशक्नुवन् क्षणं तूष्णीम् आस्त। भूयः पृष्टः सः - `देव! प्रसीद । अहम् अतीव दरिद्रोऽस्मि । चौर्येणैव मया जीवनं क्रियते, क्षम्यताम् ' - इत्यवदत्। तच्छ्रुत्वा कुपितः राजा वधदण्डम् आदिष्टवान् ।।



सुधीः भुक्कुण्डः अतिकठिनाम् इमां राजाज्ञां श्रुत्वा भृशं व्याकुलीभूतोऽपि स्वकवितया दण्डात् आत्मानं मोचयितुमिच्छन् कविषु राज्ञः परमं वात्सल्यं जानानः प्रत्युत्पन्नमतिः निर्भीकः प्राह –

'भट्टिर्नष्टो भारविस्सोऽपि नष्टो

भिक्षुर्नष्टो भीमसेनोऽपि नष्टः ।

भुक्कुण्डोऽहं भूपतिस्त्वं च राजन्

भभावल्यामन्तकः सन्निविष्टः ।। इति ।

तदाकर्ण्य कविवत्सलः राजा – भो भुक्कुण्ड ! दण्डार्होऽपि त्वं सुकविरासीः इति मया क्षम्यसे । इतः परम् ईदृशं कर्म मा कुरु' इत्युक्त्वा तेन गृहीतं सर्वं धनं तत्तत्स्वामिभ्यः प्रत्यर्प्य स्वदत्तेन प्रभूतेन वित्तेन तं सम्भावयामास । भुक्कुण्डोऽपि तदारभ्य त्यक्तचौर्यः राज्ञः प्रीतेः पात्रीभूतः सपुत्रकलत्रः सुखम् उवास ।

## अभ्यासः

### I. अधो दत्तानाम् शब्दानाम् अर्थं लिखत-

1. कृतविद्यः – educated
2. सदनम् – house
3. महार्घाणि – precious
4. भूषणानि – ornaments
5. निभृतम् – silently
6. आरक्षकाः – soldiers
8. कृत्यम् – action
9. क्षणम् – moment
10. दरिद्रः – poor
12. वसतिः – House
13. वणिजः – merchants
14. भृशम् – very much
15. वधदण्डम् – death sentence

### II. कः कं प्रति अवदत् इति लिखत–

| | | कः | कम् |
|---|---|---|---|
| 1. कोऽयम्? | – | ______ | ______ |
| 2. श्रुत्वा देवः प्रमाणम् | – | ______ | ______ |
| 3. अहम् अतीव दरिद्रोऽस्मि | – | ______ | ______ |
| 4. इतः परम् ईदृशं कर्म मा कुरु | – | ______ | ______ |
| 5. रे! अपि सत्यं यदेते कथयन्ति | – | ______ | ______ |



Unit 6.indd 39 06-06-2018 12:41:11

## III. रिक्तस्थानानि पूरयत-

1. ________भुक्कुण्डो नाम चोरः बभूव ।
2. सः नगरमार्गे निर्गच्छन् ___________ गृहीतः ।
3. राजा ________अपृच्छत् ।
4. अहम् अतीव __________ अस्मि ।
5. तच्छ्रुत्वा कुपितः राजा _________ आदिष्टवान् ।

## IV. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. धारानगरे कीदृशः चोरः बभूव?
2. कः आरक्षकैः गृहीतः?
3. राजा आरक्षकान् किम् अपृच्छत्?
4. आरक्षकाः किम् आहुः?
5. कः तूष्णीम् आस्त?
6. कुपितः राजा किम् अकरोत्?
7. भुक्कुण्डेन रचितं श्लोकं लिखत।
8. राजा भुक्कुण्डं केन सम्भावयामास?

## V. विस्तरेण उत्तरत-

1. धीरश्चोरः इति कथां संक्षिप्य लिखत।



Unit 6.indd 40 06-06-2018 12:41:11

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### कविपरिचयः -

भोजप्रबन्धस्य रचयिता कविः वल्लालदेवः ।

एष काशीनिवासी विद्वान् आसीत्।

### भोजप्रबन्धः -

भोजप्रबन्धः संस्कृतसाहित्यस्य एकम् अनुपम् ग्रन्थरत्नम् भवति ।

गद्यपद्यात्मके अस्मिन् प्रबन्धे अवतरणिकावर्जं पञ्चाशीति-कथाः विद्यन्ते ।

### भोजप्रबन्धात् कतिपयाः प्रसिद्धाः श्लोकाः -

अद्य धारा निराधारा
निरालम्बा सरस्वती ।
पण्डिताः खण्डिताः सर्वे
भोजराजे दिवं गते ।

अद्य धारा सदाधारा
सदालम्बा सरस्वती।
पण्डिता मण्डिता सर्वे
भोजराजे धरां गते ।।

### Weblinks :

1. www.Sangatham.com
2. https://fairytaler.com/a_clever_theif
3. https://www.scribd.com/doc/Panchatantra



Unit 6.indd 41 06-06-2018 12:41:12

## व्याकरण–अभ्यासः - 3

### (i) अजन्तनपुंसकलिङ्गशब्दाः

### अकारान्तः नपुंसकलिङ्गः फल शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | फलम् | फले | फलानि |
| द्वितीया | फलम् | फले | फलानि |
| तृतीया | फलेन | फलाभ्याम् | फलैः |
| चतुर्थी | फलाय | फलाभ्याम् | फलेभ्यः |
| पञ्चमी | फलात् | फलाभ्याम् | फलेभ्यः |
| षष्ठी | फलस्य | फलयोः | फलानाम् |
| सप्तमी | फले | फलयोः | फलेषु |
| सम्बोधन-प्रथमा | हे फल ! | हे फले ! | हे फलानि ! |

### अकारान्तः नपुंसकलिङ्गः मित्र शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मित्रम् | मित्रे | मित्राणि |
| द्वितीया | मित्रम् | मित्रे | मित्राणि |
| तृतीया | मित्रेण | मित्राभ्याम् | मित्रैः |
| चतुर्थी | मित्राय | मित्राभ्याम् | मित्रेभ्यः |
| पञ्चमी | मित्रात् | मित्राभ्याम् | मित्रेभ्यः |
| षष्ठी | मित्रस्य | मित्रयोः | मित्राणाम् |
| सप्तमी | मित्रे | मित्रयोः | मित्रेषु |
| सम्बोधन-प्रथमा | हे मित्र ! | हे मित्रे ! | हे मित्राणि ! |



Unit 6.indd 42 06-06-2018 12:41:12

## इकारान्तः नपुंसकलिङ्गः वारि शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वारि | वारिणी | वारीणि |
| द्वितीया | वारि | वारिणी | वारीणि |
| तृतीया | वारिणा | वारिभ्याम् | वारिभिः |
| चतुर्थी | वारिणे | वारिभ्याम् | वारिभ्यः |
| पञ्चमी | वारिणः | वारिभ्याम् | वारिभ्यः |
| षष्ठी | वारिणः | वारिणोः | वारीणाम् |
| सप्तमी | वारिणि | वारिणोः | वारिषु |
| सम्बोधन-प्रथमा | हे वारे !, हे वारि ! | हे वारिणी ! | हे वारीणि ! |

## उकारान्तः नपुंसकलिङ्गः मधु शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मधु | मधुनी | मधूनि |
| द्वितीया | मधु | मधुनी | मधूनि |
| तृतीया | मधुना | मधुभ्याम् | मधुभिः |
| चतुर्थी | मधुने | मधुभ्याम् | मधुभ्यः |
| पञ्चमी | मधुनः | मधुभ्याम् | मधुभ्यः |
| षष्ठी | मधुनः | मधुनोः | मधूनाम् |
| सप्तमी | मधुनि | मधुनोः | मधुषु |
| सम्बोधन-प्रथमा | हे मधो !, हे मधु ! | हे मधुनी ! | हे मधूनि ! |



Unit 6.indd 43 06-06-2018 12:41:12

## अनुच्छेदलेखनम् – 3

### (Comprehension – 3)

पुरा भगवान् वेदव्यासः महाभारतं नाम इतिहासं कर्तुं स्वेन रचितानां श्लोकानां लेखनार्थं गणेशं प्रार्थयामास। सोऽपि स्वमुखात् एकं दन्तं उद्धृत्य तं लेखनीवत् उपयुयोज। श्लोकांश्च अविच्छेदेन अलिखत् । अनेन हेतुना गणपतिः एकदन्तः इति अपरं नाम अवाप । सः मुहुर्मुहुः "पश्चात् कथय कथय" इति व्यासं त्वरयामास । तेन खिन्नः व्यासः "मम श्लोकानाम् अर्थम् अविज्ञाय भवता विलेखनं न कर्तव्यम्" इति गजाननम् उवाच । तदा काञ्चन गूढार्थान् श्लोकान् कथमास। यावत् विघ्नेश्वरः तेषाम् अर्थं विचिन्तयन् आसीत्, तावत् वेदव्यासः श्रमं विना अपरान् श्लोकान् रचयमास । एवम् उभाभ्यामपि विश्रान्तिः लब्धा ।



**प्रश्नाः**

1. वेदव्यासः किम् इतिहासं लिखितवान् ?
2. वेदव्यासः श्लोकानां लेखनार्थं कं प्रार्थयामास?
3. गणपतेः अपरं नाम किम्?
4. व्यासः कीदृशान् श्लोकान् कथयामास?
5. उभाभ्यामपि का लब्धा?

## अनुवादः – 3

### (Translation – 3)

अवन्तिदेशस्य राजधान्याम् उज्जयिन्यां विक्रमादित्यो नाम धार्मिकः महीपालः शशास। एकदा तस्य भूपतेः धार्मिकतां परीक्षितुं कामधेनोः दुहिता सुरभिः देवलोकात् महीम् आजगाम। आगत्य च, विक्रमस्य आगमनमार्गे कुत्रचित् महती पङ्के निमग्ना सा, परमं विषादम् अनुभवन्तीव तस्थौ। नृपतिश्च तस्याः दुरवस्थाम् अवलोक्य, दयार्द्रः बभूव। सद्यः एव सः स्वसुखम् अविचिन्त्य, पङ्कम् अवगाह्य, तां गां पङ्कात् उद्धृत्य, बहिः अनयत्। अथ, तां शुद्धजलैः प्रक्षाल्य, प्रीत्या तस्यै घासमुष्टीश्च दत्वा, तां बहुधा समुपाचरत्। तेन नितरां प्रसन्ना सा दिव्यधेनुका, तदीया भूत्वा, राजगृहे एव सुचिरं सुखं न्यवसत्।।



Unit 6.indd 44 06-06-2018 12:41:12